# राष्ट्रियसेवायोजनापक्षत: समायोजिता: कार्यक्रमा:



## "राष्ट्रियसेवायोजनादिवसस्य स्वर्णजयन्तीमहोत्सव:"

विद्यापीठस्य राष्ट्रियसेवायोजनाकेन्द्रत: नैके समाजोपयोगिन: कार्यक्रमा: प्रचाल्यन्ते। तेषु कार्यक्रमेषु गते सितम्बरमासे चतुर्विंशतितमे दिनाङ्के (24/09/2019) केन्द्रस्य सप्तसम्भागै: **"राष्ट्रियसेवायोजनादिवसस्य स्वर्णजयन्तीमहोत्सव:"** साडम्बरं पर्यपाल्यत। अवसरेऽस्मिन् विद्यापीठस्य मान्या: कुलपतय: आचार्य वि.मुरलीधरशर्ममहोदया: मुख्यातिथिरूपेण समुपागत्य जीवनेऽस्माकं सेवाधर्मस्य वैशिष्ट्यमाविरकुर्वन् तथा च छात्रचरित्रनिर्माणे अस्य कियन्ती भूमिका वर्तते तदस्मारयन्। जनसेवा सदा सर्वदा मानवस्योत्तमं कार्यं भवतीति "मानवसेवा माधवसेवा" इति सूक्ते: प्राधान्यं प्रबोधयन्त: श्रीशर्ममहोदया: संस्कृतभाषायामस्या: स्पन्दनं प्रत्यपादयन्। अत: संस्कृतविद्यापीठे अधीयाना: सर्वेऽपि छात्रा: अस्य धर्मस्य व्रतिन: स्युरिति प्राचोदयन्। राष्ट्रियसेवायोजनाया: संयोजका: आचार्यसत्यनारायणमहोदया: Power Point Presentation माध्यमेन योजनाया अस्या: विविधकार्यक्रमाणां विषये सूचनां प्रायच्छन्। कार्यक्रमेऽस्मिन् आदौ डॉ.ओ.जि.पि.कल्याणशास्त्री योजनाया: तृतीयसम्भागस्य कार्यनिर्वाहाधिकारी सर्वेषां स्वागतमकार्षीत्। तथा च द्वितीयसम्भागाधिकारिण: डॉ.आर्.चन्द्रशेखरमहोदया: धन्यवादान् समार्पयन्। सर्वेषामपि सप्तसम्भागानां निर्वाहाधिकारिण:, विद्यापीठाध्यापका:, कर्मचारिण:, छात्राश्च अस्मिन् समुपस्थाय कार्यक्रमं सफल्यकुर्वन्। अस्य कार्यक्रमस्याङ्गभूततया अष्टाविंशतितमे दिनाङ्के "स्वच्छभारताभियानम्" इत्यंशे सेवाव्रतिन: विद्यापीठस्य सेवायोजनास्वयंसेवका: छात्रा: प्रात:काले विद्यापीठक्रीडाप्रान्तर-कर्मचारिप्रासादपरिसर-छात्रावासपरिसरादिपरिष्करणकार्याणि समपादयन्।









## योजनाया: प्रथमसम्भावस्य नवनियुक्ताधिकारी



विद्यापीठस्य गणितविभागस्य विभागाध्यक्ष: डा.ए.चन्दुलालमहोदय: राष्ट्रियसेवायोजनाया: प्रथमसम्भावस्य (1st Unit) कार्यनिर्वाहकाधिकारिरूपेण (Programme Officer) नूतनतया **11.07.2019** तमे दिनाङ्के नियुक्त:।